चैत्रस्य कृष्णैकादशी पापमोचनी ९ शुक्ला कामदा १०। वैशाखस्य कृष्णैकादशी वरूथिनी ११ शुक्ला मोहनी १२। ज्यैष्ठस्य कृष्णैकादशी अपरा १३ शुक्ला निर्जला १४। आषाढ़स्य कृष्णैकादशी योगिनी १५ शुक्ला पद्मा १६। श्रावणस्य कृष्णैकादशी कामिका १७ शुक्ला पुत्रदा १८। भाद्रस्य कृष्णैकादशी अजा १९ शुक्ला वामना २०। आश्विनस्य कृष्णैकादशी इन्दिरा २१ शुक्ला पापाङ्कुशा २२। कार्त्तिकस्य कृष्णैकादशी रमा २३ शुक्ला प्रबोधिनी २४। मलमासस्य शुक्लैकादशी सुभद्रा २५ कृष्णा कमला २६॥ * ॥ इत्येकादशीप्रकरणं समाप्तम्॥ (संख्याविशेषः। एगार इति भाषा। यथा महाभारते ६।२६।२१।

"एकादश धार्त्तराष्ट्री कौरवाणां महाचमूः" ॥)

एकाद्नविंशतिः, त्रि, (एकेन न विंशतिः। "एकादिश्चैकस्य चादुक्"।६।३।७६। इत्यनेन सिद्धम्।) एकोनविंशतिः १९। इति व्याकरणम्॥

एकानंशा, स्त्री, (एको न अंशो यस्याः।) पार्व्वती। इति त्रिकाण्डशेषः॥ (इयं हि यशोदागर्भसम्भवा। यदुक्तं हरिवंशे। ५९।१४ ४७।

"देवक्यजनयत् विष्णुं यशोदा तां तु कन्यकाम्"।
"विद्धि चैनामथोत्पन्नां अंशाद्देवीं प्रजापतेः।
एकानंशां योगकलां रक्षार्थं केशवस्य तु" ॥)

एकान्तं, क्ली, (एकस्मिन्नेव अन्तः समाप्तिर्यस्य।) अत्यन्तम्। तत्पर्य्यायः। अतिशयः २ भरः ३ अतिवेलम् ४ भृशम् ५ अत्यर्थम् ६ अतिमात्रम् ७ उद्गाढ़म् ८ निर्भरम् ९ तीव्रम् १० नितान्तम् ११ गाढ़म् १२ बाढ़म् १३ दृढ़म् १४। (यथा माघे २।८३।

"तेजः क्षमा वा नैकान्तं कालज्ञस्य महीपतेः"॥

तद्वति, त्रि। यथा कुमारे १।३६।

"नागेन्द्रहस्तास्त्वचि कर्कशत्वा-
देकान्तशैत्यात् कदलीविशेषाः"॥

तथा भागवते।२।४।४।

तस्य पुत्त्रो महायोगी समदृङ्निर्विकल्पकः।
एकान्तमतिरुन्निद्रो गूढ़ो मूढ़ इवेयते" ॥)

भेद्यगामिनि त्रि। इत्यमरः॥ (सर्व्वत्र यदवधारणोच्यते स एकान्तः॥ यथा "हृद्विरेचयति मदनफलं वामयतीति"॥ इत्युत्तरतन्त्रे ६५ अध्याये सुश्रुतेनोक्तम्॥) निर्ज्जनम्। (यथा हितोपदेशे विग्रहे। २५। "अथ केनापि शस्यरक्षकेण धूसरकम्बलकृततनुत्राणेन धनुःकाण्डं सज्जीकृत्यावनतकायेन एकान्ते स्थितम्"॥)

एकान्ती [न्] (एकान्तमस्त्यस्य। एकान्त+इनि।) विष्णुभक्तविशेषः। यथा, गारुड़े १३१ अध्याये।

"एकान्तेनासमो विष्णुर्यस्मादेषां परायणः।
तस्मादेकान्तिनः प्रोक्तास्तद्भागवतचेतसः॥
प्रियाणामपि सर्व्वेषां देवदेवस्य स प्रियः।
आपत्स्वपि तदा यस्य भक्तिरव्यभिचारिणी"॥

एकान्नः, त्रि, (एकं एककालपक्वं अन्नं यत्र।) एकभक्तः। यथा। काशीखण्डे।

"ऊर्ज्जे यवान्नमश्नीयादेकान्नमथवा पुनः।
वृन्ताकं सूरणञ्चैव शूकशिम्बीश्च वर्ज्जयेत्"॥

इति तिथ्यादितत्त्वम्॥ एकं अविभक्तमन्नं यस्य इति व्युत्पत्त्या एकपाकावस्थितः। अविभक्तः। यथा,

"एकपाकेन वसतां पितृदेवद्विजार्च्चनम्।
एकं भवेद्विभक्तानां तदेव स्याद्गृहे गृहे"॥

इति प्रायश्चित्ततत्त्वधृतवृहस्पतिवचनम्॥

एकान्नविंशति, त्रि, (एकेन न विंशतिः। "एकादिश्चैकस्य चादुक्"। ६ ३।७६। नञो विंशत्या समासे कृते एकशब्देन सह तृतीयेति योगविभागात् समासः। अनुनासिकविकल्पः।) एकोनविंशतिः १९। इति व्याकरणम्॥

एकाब्दा, स्त्री, (एकोऽब्दो यस्याः सा।) एकहायनी। एकवत्सरवयस्कागवी। इत्यमरः॥

एकायनः, त्रि, (एकं अयनं विषयो यस्य।) एकाग्रः। एकविषयासक्तचित्तः। इत्यमरः। (यथा छान्दोग्योपनिषदि। ७।४।२। तानि ह वा एतानि संकल्पैकायनानि सङ्कल्पात्मकानि संकल्पे प्रतिष्ठितानि"। एकमयनं गतिर्यत्र। एकमात्रगमनयोग्यः। यदुक्तं महाभारते ३।१४६।६६।

"अनेनैव पथा मा वै गच्छेदिति विचार्य्य सः।
आस्त एकायने मार्गे कदलीषण्डमण्डिते" ॥)

एकायनगतः त्रि, (एकायनं गतः प्राप्तः। एकस्मिन्नयने गतं ज्ञानमस्येति वा।) एकाग्रः। इत्यमरः॥

एकावली, स्त्री, (एका श्रेष्ठा आवली माला।) एकयष्टिका। इत्यमरः॥ एकनर हार इति भाषा। (अलङ्कारविशेषः। तल्लक्षणादिकमुक्तं साहित्यदर्पणे १० परिच्छेदे। १०१। यथा,—

"पूर्व्वं पूर्व्वं प्रति विशेषणत्वेन परं परम्।
स्थाप्यतेऽपोह्यते वा चेत्स्यात्तदैकावली द्विधा"॥

क्रमेणोदाहरणम्। तत्रैव।

"सरो विकसिताम्भोजमम्भोजं भृङ्गसङ्गतम्।
भृङ्गा यत्र ससङ्गीताः सङ्गीतं सस्मरोदयम्"॥

"न तज्जलं यन्न सुचारुपङ्कजं
न पङ्कजं तद्यदलीनषट्पदम्।
न षट्पदोऽसौ न जुगुञ्ज यः कलं
न गुञ्जितं तन्न जहार यन्मनः"॥

भट्टिः।२।१९॥ क्वचिद्विशेष्यमपि यथोत्तरं विशेषणतया स्थापितमपोहितञ्च दृश्यते। यथा,—

"वाप्यो भवन्ति विमलाः स्फुटन्ति कमलानि वापीषु।
कमलेषु पतन्त्यलयः करोति सङ्गीतमलिषु पदम्"॥

एवमपोहनेऽपि॥)

एकाश्रितगुणः, पुं, (एकस्मिन् पदार्थे आश्रितो गुणः।) एकवृत्तिधर्म्मः। तद्यथा। रूपम् १ रसः २ गन्धः ३ स्पर्शः ४ एकत्वम् ५ एकपृथक्त्वम् ६ परिमाणम् ७ परत्वम् ८ अपरत्वम् ९ बुद्धिः १० सुखम् ११ दुःखम् १२ इच्छा १३ द्वेषः १४ यत्नः १५ गुरुत्वम् १६ द्रवत्वम् १७ स्नेहः १८ संस्कारः १९ अदृष्टम् २० शब्दः २१। इति सिद्धान्तमुक्तावली॥ ९०॥

एकाष्ठीलः, पुं, (एकमस्थि लाति। ला+क। सुषामादित्वात् षत्वं दीर्घत्वञ्च।) वकवृक्षः। इति कश्चिदमरः॥

एकाष्ठीला, स्त्री, (एकाष्ठील+टाप्।) वकवृक्षः। इत्यमरः॥ पाठा। इति राजनिर्घण्टः॥ आकनादि इति भाषा। (अस्याः पर्य्याया यथा॥

"अम्बष्ठाम्बष्ठकी पाठा कुचेला पापचेलिका।
एकाष्ठीला वरा तिक्ता प्राचीनीका शिवावुका"॥

इति वैद्यकरत्नमाला॥)

एकाहः, पुं, (एकमहः। "उत्तमैकाभ्याञ्च" ।५।४।९० इत्यनेन सिद्धम्।) एकदिनम्। इति व्याकरणम्॥ (यथा, मनुः ५।५९।

"अर्व्वाक् सञ्चयनादस्थ्नां त्र्यहमेकाहमेव च" ॥)

एकाहारः, पुं, (एकः न द्वितीय आहारः।) एकदिनवृत्त्येकवारभोजनम्। यथा।

"एकाहारः सदा कार्य्यो न द्वितीयः कदाचन।
पर्य्यङ्कशायिनी नारी विधवा पातयेत् पतिम्"॥

इति शुद्धितत्त्वधृतस्मृतिः॥

एकीयः, त्रि, (एकस्मिन् तिष्ठतीति। एक+छ।) एकपक्षः। सहायः। सहभावी। इति त्रिकाण्डशेषः॥

एकोद्दिष्टं, क्ली, (एकः प्रेत एव उद्दिष्टो यत्र।) प्रेतोद्देश्यकश्राद्धम्। यथा। गोभिलः अथैकोद्दिष्टमेकं पवित्रमेकोऽर्घ्यः एकः पिण्डो नावाहनं नाग्नौकरणं नात्र विश्वे देवाः स्वदितमिति तृप्तिप्रश्नः सुस्वदितमिति प्रत्युत्तरम्। उपतिष्ठतामित्यक्षय्यस्थाने अभिरम्यतामिति विसर्गोऽभिरतोऽस्मीति प्रतिवचनमेतत् प्रेतश्राद्धमिति॥ * ॥ एतत् प्रेतश्राद्धमित्युपसंहारात् एकं प्रेतमुद्दिश्य यद्दीयते श्राद्धं तदेकोद्दिष्टमिति वैदिकप्रयोगाधीनं यौगिकम्। अतएव प्रतिसांवत्सरिकस्य नैकोद्दिष्टत्वं किन्त्वेकोद्दिष्टविधिकत्वं अत्रार्घ्यैक्याद्दिदलरूपसङ्केतितपवित्रैक्यप्राप्तौ एकं पवित्रमिति पुनरभिधानसार्थकत्वाय तदवयवैकदलपरम्। अत्र नावाहनं नाग्नौ करणमिति निषेधयोः पौर्व्वापर्य्यादग्नौ करणपूर्व्वकालीनं प्रधानसम्बन्धि श्राद्धसूत्रोद्दिष्टं श्राद्धार्थावाहनमेव निषिध्यते न त्वप्रधानसम्बन्धि पितृयज्ञवदित्यतिदेशप्राप्तं पिण्डार्थावाहनमिति। एतेन पिण्डार्थावाहननिषेधो मैथिलोक्तो हेयः। अत्राग्नौ करणनिषेधेन कृतशेषस्यालाभे कृतशेषं दत्त्वा पात्रमालभ्य जपति पृथिवीत्यादि स्वाहा इत्यन्तसूत्रोक्तपात्रालम्भनस्यापि बाधः। आनन्तर्य्याभावात् अमृतमिति मन्त्रलिङ्गविरोधाच्च। स्वदितमिति तृप्तिप्रश्न इति तृप्ताः स्थ इति तृप्तिप्रश्ने स्वदितमिति प्रश्नः। कुशमयब्राह्मणपक्षे तु प्रतिवचनानुपपत्त्या प्रश्नस्यापि निवृत्तिः। अक्षय्यशब्दस्थाने उपतिष्ठतामिति प्रयोगः अत्रोपतिष्ठतामित्यनेन अन्नादिकमित्यस्यान्वये अस्त्वित्यस्य अन्वयानुपपत्त्या तस्याप्यप्रयोगः। अतएव पितृदयितायामन्नादिकमुपतिष्ठतामिति लिखितम्। अभिरम्यतामिति वाजे वाजे इति स्थाने अभिरम्यतामित्यनेन विसर्जनमिति। एतदिति पूर्व्वोक्तेतिकर्त्तव्यताकश्राद्धमित्यर्थः। प्रेतश्राद्धं प्रेतस्य श्राद्धं न तु पार्व्वणविकृतित्वेन प्राप्तपितृलोकरूपपितुः श्राद्धं अकृतसपिण्डीकरणस्य तथाविधपितृत्वाभावात्। अतएवैतन्न्यायमूलकमेवाश्वलायनगृह्यपरिशिष्टेऽपि पितृ-